# ॥ श्री रुद्रप्रश्नः - नमकम् - प्रथमोऽनुवाकः ॥

# || śrī rudrapraśnaḥ - namakam - prathamo'nuvākaḥ ||

### Šrí Rudram – Namakam – 1. anuváka

ॐ नमो भगवते रुद्राय ॥
om namo bhagavate rudrāya ||

ॐ नमस्ते रुद्र मन्यव उतोत इषवे नमः ।
नमस्ते अस्तु धन्वने बाहुभ्यामुत ते नमः ।
om namaste rudra manyava utota iṣave namaḥ |
namaste astu dhanvane bāhubhyāmuta te namaḥ |

या त इषुः शिवतमा शिवं बभूव ते धनुः ।
शिवा शरव्या या तव तया नो रुद्र मृडय ।
yā ta iṣuḥ śivatamā śivaṁ babhūva te dhanuḥ |
śivā śaravyā yā tava tayā no rudra mṛḍaya |

या ते रुद्र शिवा तनूरघोराऽपापकाशिनी ।
तया नस्तनुवा शन्तमया गिरिशंताभिचाकशीहि ।
yā te rudra śivā tanūraghorā'pāpakāśinī |
tayā nastanuvā śantamayā giriśantābhicākaśīhi |

यामिषुं गिरिशंत हस्ते बिभर्ष्यस्तवे ।
शिवां गिरित्र तां कुरु मा हिगूंसीः पुरुषं जगत् ।
yāmiṣuṁ giriśanta haste bibharṣyastave |
śivāṁ giritra tāṁ kuru mā higṁsīḥ puruṣaṁ jagat |

शिवेन वचसा त्वा गिरिशाच्छावदामसि ।
यथा नः सर्वमिज्जगदयक्ष्मगं सुमना असत् ।
śivena vacasā tvā giriśācchāvadāmasi |
yathā naḥ sarvamijjagadayakṣmagṁ sumanā asat |

अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक ।
अहींश्च सर्वाञ्जम्भयन्त्सर्वाश्च यातुधान्यः ।
adhyavocadadhivaktā prathamo daivyo bhiṣak |
ahīgśca sarvāñjambhayantsarvāśca yātudhānyaḥ |

असौ यस्ताम्रो अरुण उत बभ्रुः सुमङ्गलः ।
ये चेमागं रुद्रा अभितो दिक्षु श्रिताः सहस्रशोऽवैषागं हेड ईमहे ।
asau yastāmro aruṇa uta babhruḥ sumaṅgalaḥ |
ye cemāgṁ rudrā abhito dikṣu śritāḥ sahasraśo'vaiṣāgṁ heḍa īmahe |

असौ योऽवसर्पति नीलग्रीवो विलोहितः ।
उतैनं गोपा अदृशन्नदृशन्नुदहार्यः ।
उतैनं विश्वा भूतानि स दृष्टो मृडयाति नः ।
asau yo'vasarpati nīlagrīvo vilohitaḥ |
utainaṁ gopā adṛśannadṛśannudahāryaḥ |
utainaṁ viśvā bhūtāni sa dṛsṭo mṛḍayāti naḥ |

नमो अस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे ।
अथो ये अस्य सत्त्वानोऽहं तेभ्योऽकरन्नमः ।
namo astu nīlagrīvāya sahasrākṣāya mīḍhuṣe |
atho ye asya sattvāno'haṁ tebhyo'karannamaḥ |

प्रमुञ्च धन्वनस्त्वमुभयोरार्त्नि योर्ज्याम्।
याश्च ते हस्त इषवः परा ता भगवो वप।
pramuñca dhanvanastvamubhayorārtni yorjyām |
yāśca te hasta iṣavaḥ parā tā bhagavo vapa |

अवतत्य धनुस्त्वग्ं सहस्राक्ष शतेषुधे।
निशीर्य शल्यानां मुखा शिवो नः सुमना भव।
avatatya dhanustvagṁ sahasrākṣa śateṣudhe |
niśīrya śalyānāṁ mukhā śivo naḥ sumanā bhava |

विज्यं धनुः कपर्दिनो विशल्यो बाणवाग्ं उत।
अनेशन्नस्येषव आभुरस्य निषंगथिः।
vijyaṁ dhanuḥ kapardino viśalyo bāṇavāgṁ uta |
aneśannasyeṣava ābhurasya niṣaṅgathiḥ |

या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः ।
तयाऽस्मान् विश्वतस्त्वमयक्ष्मया परिब्भुज।
yā te hetirmīḍhuṣṭama haste babhūva te dhanuḥ |
tayā'smān viśvatastvamayakśmayā paribbhuja |

नमस्ते अस्त्वायुधायानातताय धृष्णवे।
उभाभ्यामुत ते नमो बाहुभ्यां तव धन्वने।
namaste astvāyudhāyānātatāya dhṛṣṇave |
ubhābhyāmuta te namo bāhubhyāṁ tava dhanvane |

परि ते धन्वनो हेतिरस्मान्वृणक्त विश्वतः।
अथो य इषुधिस्तवारे अस्मन्निधेहि तम्॥
pari te dhanvano hetirasmānvṛṇaktu viśvataḥ |
atho ya iṣudhistavāre asmannidhehi tam ||

नमस्ते अस्तु भगवन्विश्वेश्वराय महादेवाय त्र्यम्बकाय
त्रिपुरान्तकाय त्रिकाग्निकालाय कालाग्निरुद्राय नीलकण्ठाय मृत्युञ्जयाय
सर्वेश्वराय सदाशिवाय श्रीमन्महादेवाय नमः ॥

namaste astu bhagavanviśveśvarāya mahādevāya tryambakāya
tripurāntakāya trikāgnikālāya kālāgnirudrāya nīlakaṇṭhāya mṛtyuñjayāya
sarveśvarāya sadāśivāya śrīmanmahādevāya namaḥ ||